("केचिदाचार्य्या ब्रुवते द्रव्यं प्रधानं कस्माद्-व्यवस्थितत्वादिह खलु द्रव्यं व्यवस्थितम्। न रसादयो यथा ये फले ये रसादयस्ते पक्वे न सन्ति। नित्यत्वाच्च नित्यं हि द्रव्यमनित्या गुणा यथा कल्कादिप्रविभागः स एव सम्पन्नरसगन्धो व्यापन्नरसगन्धो वा भवति। स्वजात्यवस्थानाच्च यथा हि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणि। पञ्चेन्द्रियग्रहणाच्च पञ्चभिरिन्द्रियैर्गृह्यते द्रव्यं न रसादयः। आश्रयत्वाच्च द्रव्यमाश्रिता रसादयो भवन्ति। आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भो यथा विदारिगन्धादिमाहृत्य सङ्क्षुद्य विपचेदित्येवमादिषु न रसादिष्वारम्भः। शास्त्रप्रामाण्याच्च शास्त्रे हि द्रव्यं प्रधानमुपदेशे हि योगानां यथा मातुलुङ्गाग्निमन्थौ चेति न रसादय उपदिश्यन्ते। क्रमापेक्षितत्वाच्च रसादीनां रसादयो हि द्रव्यक्रममपेक्षन्ते यथा तरुणे तरुणाः सम्पूर्णे सम्पूर्णा इति। एकदेशसाध्यत्वाच्च द्रव्याणामेकदेशेनापि व्याधयः साध्यन्ते यथा महावृक्षक्षीरेणेति तस्माद्द्रव्यं प्रधानं द्रव्यलक्षणन्तु क्रियागुणवत्समवायिकारणमिति।"

"पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्।
रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतम्॥"

"वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः।
रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः॥
द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न षड्रसाः।
श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः॥"
इति सुश्रुते। १। ४०॥)

वित्तम्। वित्तम्। पृथिव्यादि। विलेपनम्। क्लीवम्। भेषजम्। भव्यम्। (द्रोर्विकारः। "द्रोश्च।" ४। ३। १६१। इति यत्।) द्रुमविकारे, त्रि। इति मेदिनी। ये, २६॥ (द्रुमावयवः। इति सिद्धान्तकौमुदी॥) जतु। विनयः। इति हेमचन्द्रः॥ मद्यम्। यथा,—

"सशब्दं न पिबेद्द्रव्यम्।" इति कुलार्णवतन्त्रम्॥

न्यायमते तन्नवविधं यथा,—

"क्षित्यप्तेजोमरुद्व्योमकाला दिग्देहिनौ मनः।"

तेषां साधर्म्यादि यथा,—

"क्षित्यादीनां नवानान्तु द्रव्यत्वगुणयोगिता।
क्षितिर्जलं तथा तेजः पवनो मन एव च॥
परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी।
कालखात्मदिशां सर्व्वगतत्वं परमं महत्॥
क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शवन्ति हि।
द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम्॥
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते।
रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमं त्रिकम्॥
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः।
आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः॥"
इति भाषापरिच्छेदः॥

द्रव्यहस्तभक्षणादिदोषादोषौ यथा,—

"उच्चावचाशुभागेषु द्रव्यहस्तो भवेन्नरः।
भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत्॥
तैजसं वै समादाय यद्युच्छिष्टो भवेद्द्विजः।
भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत्॥
यद्यद्द्रव्यं समादाय भवेदुच्छेषणान्वितः।
अनिधायैतरद्द्रव्यमाचान्तः शुचितामियात्॥
वस्त्रादिषु विकल्पः स्यात्तत् संस्पृष्ट्वा चाचमेदिह।
अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि।
कृत्वा मूत्रपुरीषं वा द्रव्यहस्तो न दुष्यति॥"
इति कूर्म्मपुराणम्॥

द्रा, ल स्वप्ने। पलायने। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-अनिट्।) स्वप्नो निद्रा। निपूर्व्व एव निद्रायामिति रमानाथः। ल, निद्राति निद्रालुः। द्राति चौरः पलायते इत्यर्थः। इति दुर्गादासः॥

द्राक्, व्य, (द्रातीति। द्रा+बाहुलकात् कुः।) द्रुतम्। शीघ्रम्। इत्यमरः। ३। ४। ३॥ (यथा, नैषधे। ३। २।

"आकस्मिकः पक्षपुटाहतायाः
क्षितेस्तदा यः स्वन उच्चचार।
द्रागन्यविन्यस्तदृशः स तस्याः
सम्भ्रान्तमन्तःकरणं चकार॥")

द्राक्ष, इ काङ्क्षे। घोररुते। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकंच-सेट्।) रेफयुक्तः। घोररुतमिह तिरश्चामेव घोरशब्दः। इ, द्राङ्क्षति काकः। नमध्यपाठेनैवेष्टसिद्धे एतस्य इदनुबन्धो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥

द्राक्षा, स्त्री, (द्राङ्क्षते काङ्क्षते इति। द्राक्षि काङ्क्षे+घञ्। आगमशासनस्यानित्यत्वात् न लोपः।) फलविशेषः। दाख इति किश्मिश् इति च भाषा। आङ्गूर इति यवनभाषा। तत्पर्य्यायः। मृद्वीका २ गोस्तनी ३ स्वाद्वी ४ मधुरसा ५। इत्यमरः। २। ४। १०७॥ चारुफला ६ कृष्णा ७ प्रियाला ८ तापसप्रिया ९ गुच्छफला १० रसाला ११ अमृतफला १२ हरिता १३ चारुफला १४। इति जटाधरः॥ रसा १५। इति शब्दरत्नावली॥ अस्या गुणाः। अतिमधुरत्वम्। अम्लत्वम्। शीतपित्तार्त्तिदाहमूत्रदोषनाशित्वम्। वृष्यत्वम्। वृष्यत्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥ स्निग्धत्वम्। शीतबलकारित्वम्। हृद्यत्वम्। तृष्णावायुरक्तपित्तक्षतक्षीणतानाशित्वञ्च। इति राजवल्लभः॥

द्राख, ऋ शोषार्थे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दन्त्यवर्गतृतीयादिः। रेफयुक्तः। ऋ, अदद्राखत्। शोषार्थे शोषालमर्थयोः। इति दुर्गादासः॥

द्राघ, ऋ ङ श्रमायामशक्तिषु। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-दीर्घीकरणे सकं-सेट्।) श्रमः खेदः। आयामो दीर्घीकरणम्। शक्तिः सामर्थ्यम्। ऋ, अदद्राघत्। ङ, द्राघते जनः खिद्यते इत्यर्थः। द्राघते वस्त्रं जनो दीर्घं करोति इत्यर्थः। द्राघते धावितुं वाजी समर्थः स्यादित्यर्थः। इति दुर्गादासः॥

द्राघिमा, [न्] पुं, दीर्घस्य भावः। (दीर्घ+इमनिच्। "प्रियस्थिरस्फिरोरुबहुलेति।" ६। ४। १५७। इति द्राघादेशः।) दीर्घत्वम्। इति व्याकरणम्॥ भूगोलस्य दीर्घता। इत्याधुनिकज्योतिषिकाः॥

द्राघिष्ठः, त्रि, (अतिशयेन दीर्घः इति। दीर्घ+इष्ठन्। दीर्घस्य द्राघादेशः।) अतिदीर्घः। इत्यमरः। ३। १। ११२॥

द्राड, ऋ ङ शीर्णौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) रेफयुक्तः। ऋ, अदद्राडत्। ङ, द्राडते। शीर्णौ विभेदे। इति दुर्गादासः॥

द्राणः, त्रि, (द्रा+कर्त्तरि क्तः। निष्ठातस्य नः। णत्वञ्च।) सुप्तः। पलायितः॥

द्रापः, पुं, (द्रापयतीति। द्रा+णिच्। पुगागमे द्रापि+अच्।) पङ्कः। आकाशः। कपर्दी। शर्व्वः। इति शब्दार्थकल्पतरुः॥

द्रामिलः, पुं, (द्रमिलाख्यो देशोऽभिजनोऽस्येति। अण्।) चाणक्यमुनिः। इति हेमचन्द्रः। ३। ५१७॥

द्रावः, पुं, द्रुधातोर्भावे घञ् प्रत्ययः। गमनम्। स्रवणम्। अनुतापः॥

द्रावकं, क्ली, (द्रवति द्रावयति वा। द्रु द्रावि+ण्वुल्।) सिक्थकम्। इति राजनिर्घण्टः॥ प्लीहरोगस्य औषधविशेषः। (यथा,—

"स्फटिकारीद्वयञ्चैव पलं द्विपलिकन्तथा।
नरसारं पलं देयं टङ्कणञ्च पलार्द्धकम्॥
कासीशं शाणयुग्मञ्च प्रत्येकं श्लक्ष्णचूर्णितम्।
सपञ्चलवणक्षारं कर्षमानं पृथक् पृथक्॥
अपामार्गस्य चापि तथा कुष्माण्डकस्य च।
रम्भावल्कलजं क्षारं प्रत्येकञ्चार्द्धशाणकम्॥
श्लक्ष्णचूर्णीकृतञ्चैतत् लिम्पाकस्वरसे भुवि।
सर्व्वमेतत् सुपिष्ट्वाथ रौद्रे दद्याद्विचक्षणः॥
आनीय काचपात्रन्तु तत्र तत् पाचयेत् भिषक्।
प्रहरार्द्धं ददौ ज्वालां वालुकाष्ठाग्निना मृदु।
सुतप्ते काचकुम्भे च ततो ज्वालां निवारयेत्॥
शीतं गते तदुद्धृत्य प्रक्षिपेच्च वराटकम्।
वराटे द्रवतां याते ततः कर्म्मसु योजयेत्॥
द्रावकस्य परीक्षेयं नान्यथा च भवत्यलम्।
गुञ्जैकं स्याद्वयस्यापि चूर्णेन मागधेन च॥
शरपुङ्खेण वा देयं तोयमुष्णं पिबेदनु॥
पथ्यमेतद्द्रुतं देयं दुष्टशीताम्बुवर्ज्जितम्॥"
इति वैद्यककषायसंग्रहे प्लीहसर्व्वोदरयकृदधिकारे॥) अस्य अन्यद्द विवरणं महाद्रावकशब्दे द्रष्टव्यम्॥

द्रावकः, पुं, (द्रवति चन्द्रांशुसम्पर्कादिति। द्रु+ण्वुल्।) प्रस्तरभेदः। (द्रावयतीति+द्रु+णिच्+ण्वुल्।) विदग्धः। (द्रवति पलायते इति। द्रु+ण्वुल्।) चौरकः। इति मेदिनी। के, १०४॥ षिड्गः। इति शब्दमाला॥ रसभेदः। इति शब्दरत्नावली॥ (द्रावि+ण्वुल्।) हृदयग्राही। द्रवकारकः। इति धरणिः॥

द्रावककन्दः, पुं, (द्रावकः कन्दो यस्य।) तैलकन्दः। इति राजनिर्घण्टः॥